# Saṁskrit Grammar – Kāraka and Samāsa

M.A. Samskrit

**Course Category: Core** **Schedule of Offering: Semester I**

**Course Credit Structure: [4]**

- **Lecture : 3 Hours per week**
- **Tutorial : 1 Hour**
- **Practical : None**

**Contact Hours per week: 4 Hours per week** **Course Code: LL624**

## Course Coordinator:

Dr. Pavankumar Satuluri

## 1. Introduction

प्राचीनेषु शास्त्रग्रन्थेषु काव्यग्रन्थेषु विविधाः कदाचिददृष्टपूर्वाः च प्रयोगाः गोचरीभवन्ति येषाम् अवगमनार्थं भाषायाः विशिष्टं ज्ञानमपेक्षितं भवति । तत्रापि कारकाज्ञानं सकलभाषाज्ञानव्यापारे प्रधानभूतं भवति, सकलवाक्यस्वरूपस्य तदायत्तत्वात् । कारकज्ञानसहकारेणैव हि वाक्येषु सुबन्तानां, तिङन्तानां च पदानां प्रयोगः यथायथं कर्तुम् अवगन्तुं च शक्यते । कारकाणां विवक्षाधीनतया अनियततत्वमपरं क्लेशं जनयति ग्रन्थाध्ययने प्रवृत्तानाम् अनधीतिनाम् ।

तदनु समासास्तु संक्षेपेण अर्थप्रतिपादकाः वैचित्र्यमावहन्तः प्रयोक्तृभिः बहुधा आदृताः सन्ति । अत एव आ वाल्मीकेः प्रयोगेभ्यः तेषां विशिष्टः स्वरसः च प्रयोगः सर्वेषु प्रधानेषु ग्रन्थेषु विविधाः चमत्कारकाः समासप्रयोगाः समुपदृश्यन्ते । तत्रापि प्रौढानां गद्यप्रबन्धानां न्यायादीनां च शास्त्राणां च अध्ययने करणीये समासस्य सम्यग्ज्ञानं विना नान्या गतिरस्ति ।

तदेवं **MA** इत्येतत्पाठ्यक्रममनुसृत्य अधीयानानां छात्राणां कृते ग्रन्थाध्ययनसौकर्यसम्पादकः एषः पाठ्यक्रमः विनिर्मितः वर्तते । अत्र उक्तैः व्याकरणांशैः सह तस्य तस्य भागस्य सम्यगवगमनाय अपेक्षिताः ग्रन्थभागाः अपि अध्येयतया निवेशिताः सन्ति ।

## 2. Objectives

अनेन क्रमेण अध्ययनस्य अन्ते छात्राः –

- शास्त्रग्रन्थानां काव्यग्रन्थानां च पदविभागपूर्वके अवगमने समर्थाः भवेयुः
- वाक्यगतानां वैशिष्ट्यानां अभिज्ञाने समर्थाः भवेयुः
- स्वारस्ययुतायाः भाषायाः अवगमने प्रयोगे च प्रवेशं प्राप्नुयुः
- स्वप्रयोगेषु सुबन्तेषु तिङन्तेषु च दोषाणां परिहरणे शक्ताः भवेयुः

## 3. Pre-requisites

संस्कृतभाषायाः वाक्यानां स्थूलरूपेण परिचयः अत्र आवश्यको भवति ।

## 4. Course outcome

अनेन क्रमेण अधीत्य छात्राः ग्रन्थानाम् अध्ययनावसरे यथायथं विभक्त्यर्थज्ञानावलम्बनेन वाक्यार्थं निश्चप्रचं ज्ञातुं समर्थाः भवेयुः**,** स्वप्रयोगेषु च दोषाणां परिहरणे शक्ता भवेयुः । एवमेव लघूनां दीर्घाणां च समस्तपदानाम् विग्रहज्ञानपुरःसरम् अर्थवर्णनसामर्थ्यम् अवाप्नुयुः ।

## 5. Readings

पाठ्यभागः कश्चिदेकः निर्दिष्टो नास्ति । बहूनां ग्रन्थानाम् उपयुक्ताः भागाः अत्र सन्निवेश्यन्ते ।

## 6. Module-wise topics

**Module 1: वर्णः पदं वाक्यं च** **8 sessions**

**Objectives:**

- भाषागतानां सन्धि**-**विभक्ति**-**कारक**-**समासादीनां व्याकरणांशानां स्थूलः परिचयः अस्मिन् खण्डे क्रियते ।

**Topics**:

- वाक्यघटकानि पदानि कानि?
- पदानि कतिविधानि भवन्ति?
- एकस्य प्रातिपदिकस्य कति रूपाणि भवन्ति, तदा अर्थभेदश्च कथं भवति?

- वर्णानाम् अत्यन्तसामीप्ये जायमानानि परिवर्तनानि कानि?

**Readings:**

## Module 2: विभक्तयः तासाम् अर्थाः च 13 sessions

**Objectives:**

- पूर्वस्मिन् खण्डे सामान्येन विभक्तिरूपाणि वाक्येषु प्रयुज्यमानानि दृष्टानि । अत्र विशिष्य तेषामर्थाः, विविधानां प्रातिपदिकानां विविधानि रूपाणि च विचार्यन्ते ।

**Topics:**

- प्रातिपदिकस्य सप्तसु विभक्तिषु निष्पन्नानां रूपाणाम् अर्थाः
- कारकाणि, तत्तत्कारकप्रतिपादिकाः विभक्तयः च
- उपपदविभक्तयः
- उपपदविभक्तीनां कारकविभक्तीनां च भेदः
- एकस्याः विभक्तेः सम्भवन्तः अनेके अर्थाः
- एकस्य अर्थस्य वाचिकाः अनेकाः विभक्तयः

**Readings:**

- सिद्धान्तकौमुदी (कारकप्रकरणम्) (चिताः भागाः)
- कारकम्, जि महाबलेश्वरभट्टः, संस्कृतभारती (अस्मात् पुस्तकात् चिताः भागाः)
- विभक्तिवल्लरी, संस्कृतभारती (अस्मात् पुस्तकात् चिताः भागाः)

## Module 3: कारकाणि – तेषां विविधेषु पदेषु व्याप्तिः च 11 sessions

**Objectives:**

- पूर्वस्मिन् खण्डे वाक्ये कारकपदानां प्रयोगः अभ्यस्तः भवति । अस्मिन् खण्डे कारकाणां व्यवस्था बोध्यते । तत्र धात्वर्थः, कारकाणां तेन सम्बन्धः, तेषां विवक्षाधीनत्वं च अत्र विस्तरेण चर्चिष्यते । एवं तस्मिन् तस्मिन् कारके विहिताः कृत्प्रत्ययाः अपि अत्र अधीयन्ते ।

**Topics:**

- धात्वर्थः - फलं व्यापारश्च
- कारकाणां स्वस्वावान्तरव्यापारद्वारा क्रियोपकारकत्वम्
- कृत्प्रत्ययेषु कारकबोधोपयोगः

- तिङन्तेषु कारकबोधोपयोगः
- समासेषु कारकोपयोगः

**Readings:**

**Module 4: समासः – 1** **13 sessions**

**Objectives:**

- अस्मिन् खण्डे समासानां विशिष्टः परिचयः उद्दिष्टः । यद्यपि सामान्यरूपेण अनेकपदसंयोगेन समासो भवतीति ज्ञातं भवत्येव**,** तथापि विग्रह**-**समासप्रक्रियादिज्ञानपूर्वकम् अत्र समासानां बोधनं भवति ।

**Topics:**

- समासोपयोगिनाम् इतरेषां च सन्धिकार्याणां परिचयः
- विविधाः समासाः
- समासप्रक्रिया
- समासभेदेषु अवान्तरभेदाः
- समासाश्रयकार्याणि

**Readings:**

- सिद्धान्तकौमुदी – समासप्रकरणम् (चिताः भागाः)
- समासः, जि महाबलेश्वर भट्टः, संकृतभारती (अस्य पुस्तकस्य चिताः भागाः)

**Module 5: समासः – 2** **15 sessions**

**Objectives:**

- अस्मिन् खण्डे चतुर्विधानां समासानाम् अवान्तरभेदाः बोध्यन्ते । तेन सहैव कतिपय समासाश्रयकार्याण्यपि परिचाययिष्यन्ते ।

**Topics:**

- तत्पुरुषस्य अवान्तरभेदाः
- अव्ययीभावस्य अवान्तरभेदाः
- ह्रस्वः पुंवद्भावश्च
- अन्यानि उत्तरपदाकार्याणि
- समासान्तविधयः

**Readings:**

- सिद्धान्तकौमुदी – समासप्रकरणम् (चिताः भागाः)
- समासः, जि महाबलेश्वर भट्टः, संकृतभारती (अस्य पुस्तकस्य चिताः भागाः)

## 7. Pedagogy

अध्यापनं प्रायः उपन्यासरूपेणैव भवति । तत्र अध्यापितानाम् अंशानां प्रयोगाः छात्रैः कक्ष्यायामेव कारयिष्यते ।

## 8. Evaluation Pattern

- Student Submissions (Group Work) : 20 Marks
- Class Participation through presentations : 15 Marks
- Mid-term Examination : 25 Marks
- End-Term Examination : 40 Marks

**Total : 100 Marks**